# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-२ (SEM-4) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – साहित्यम् | **CC-247** | समयः – ३ तः ६ |
| दिनाङ्कः – २२/४/२०१६ | सन्दर्भग्रन्थः – दशरूपकम् | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **अधोलिखितेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते ।<br>प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥<br>(२) भारतीं संस्कृतप्रायो वाग्व्यापारो नटाश्रयः ।<br>भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः ॥<br>(३) भूयसा भारती वृत्तिरेकाङ्कं वस्तुकल्पितम् ।<br>मुखनिर्वहणे साङ्गे लास्याङ्गानि दशापि च ॥ | |
| **प्रश्नः -२** | ग्रन्थोक्तदिशा “प्रकरणम्” विवेचयत ।<br>अथवा<br>ग्रन्थोक्तदिशा प्रहसनम् विवेचयत । | ०८ |
| **प्रश्नः -३** | **टिप्पणीद्वयं लेख्यम् ।** | ०४ |
| | (१) पूर्वरङ्गम्, (२) प्ररोचना, (३) कथोद्घातः, (४) प्रवृत्तकम् | |
| **प्रश्नः - ४** | **पञ्चानाम् एकैकवाक्येन उत्तरं दीयताम् ।** | ०५ |
| | (१) भारतीवृत्तैः कति भेदाः ?<br>(२) किं नाम प्ररोचना ?<br>(३) कति वीथ्यङ्गानि ?<br>(४) किं नाम नलिका ?<br>(५) किं नाम मृदवम् ?<br>(६) भाणे कति अङ्काः भवन्ति ?<br>(७) कति लास्याङ्गानि ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **अधोलिखितेषु श्लोकेषु द्वयोः ससन्दर्भ◌ं व्याख्या कार्या ।** | ०८ |
| | (१) डिमे वस्तु प्रसिद्धं स्याद्वृत्तयः कौशिकिं विना ।<br>नेतारो देवगन्धर्व-यक्षरक्षोमहोरगाः ॥<br>(२) भूतप्रेतपिशाचाद्या षोडशात्यन्तमुद्धताः ।<br>रसैरहास्यशृङ्गारैः षड्भिर्दीप्तैः समन्वितः ॥<br>(३) ख्यातं देवासुरं वस्तु निर्विमर्शास्तु ।<br>वृत्तयो मन्दकौशिक्यो नेतारो देवदानवाः ॥ | |
| **प्रश्नः -६** | ग्रन्थोक्तदिशा वीथीम् विवेचयत । | ०८ |

| | | |
|---|---|---|
| | अथवा<br>ग्रन्थोक्तदिशा ईहामृगम् विवेचयत । | |
| **प्रश्नः -७** | **एका टिप्पणी लेख्या** | ०२ |
| | (१) किं नाम विभावः ?<br>(२) किं नाम भावः ? | |
| **प्रश्नः -८** | **द्वौ प्रश्नौ ।** | ०२ |
| | (१) किं नाम मतिः ?<br>(२) किं नाम अवहित्था ?<br>(३) सत्वात् के भावाः ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **अधोलिखितेषु श्लोकेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।<br>आत्मभावं नयत्यन्यान् स स्थायीलवणाकरः ॥<br>(२) रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।<br>शममपि केचित्प्राहुः पुष्टिनाट्येषु नटस्य ॥<br>(३) रम्यदेशकलाकालवेषभोगादिसेवनैः ।<br>प्रमोदात्मा रतिः सैव यूनोरन्योन्यरक्तयोः ॥ | |
| **प्रश्नः -१०** | "अयोगो विप्रयोगश्च सम्भोगश्चेति स त्रिधा" इमां कारिकां ग्रन्थोक्तदिशा विवेचयत ।<br>अथवा<br>स्थायीभावान् ग्रन्थोक्तदिश विवेचयत । | ०८ |
| **प्रश्नः -११** | **टिप्पणीद्वयं लेख्यम्** | ०४ |
| | (१) प्रवयमानः<br>(२) रौद्रः<br>(३) वीररसस्य प्रकाराः<br>(४) बीभत्सः | |
| **प्रश्नः -१२** | **पञ्चानाम् एकैकवाक्येन उत्तरं दीयताम् ।** | ०५ |
| | (१) शृङ्गारस्य कति भेदाः ?<br>(२) वीररस्य कति भेदाः ?<br>(३) हास्यरसस्य कति भेदाः ?<br>(४) करुणरसस्य कति भेदाः ?<br>(५) शान्तरसस्य कति भेदाः ?<br>(६) कति व्यभिचारिभावाः ?<br>(७) अयोगस्य कति अवस्थाः ? | |

***